**Force,** *s.* बलं, शक्ति *f.*, सामर्थ्य (fig. also); 'the f. of this word' अस्य शब्दस्य शक्तिः &c. **2** प्रभावः; वीर्यं, शौर्यं, वि-परा-क्रमः, ऊर्जस् *n.*,प्रतापः, प्राबल्यं,गौरवं. **3** बलात्कारः, प्रसभः, साहसं, बलं, प्रमाथः, आवेशः; f. of passion' रागावेशः. **4** आवेगः, आपातः, अभिभवः. **5** सिद्धि *f.*, फलं, निष्पत्ति *f.*; 'put or bring into f.' प्रवृत् c. **6** सैन्यं, बलं, सेना, अनीकः-कं, पृतना, अनीकिनी, चमूः, वाहिनी, ध्वजिनी, चक्रं, वरूथिनी. **-v. t.** Ex. by causal of verbs, with बलात् or बलेन, or प्रवृत् c.; *See* **Compel;** 'he was f. ed to admit that &c.' इति अभ्युपगमनं अवश्यकं मेने. **2** भेद् c., प्रणुद् 6 P, समाकृष् 1 P, प्रचुद् 10, प्रोत्सह् c., **3** धृष् c., बलाद् अभिगम् 1 P, बलात्कारं कृ 8 U; 'f. an entrance' बलेन प्रविश् 6 P; 'f. a town' पुरं लंघ् 1 A, 10 or भंज् 7 P or बलात् प्रविश्. **-ed,** *a.* यत्नकृत, यत्नपूर्व, असहज, कृत्रिम, क्लिष्ट (as meaning). **-Forcible,** *a.* प्रबल, समर्थ,क्षम, शक्तिमत्, बलवत्,सप्रभाव; अमोघ,अनिष्फल,प्रभविष्णु. **2** गौरवेण उक्त or प्रतिपादित, दृढ, तीक्ष्ण.**3** बलेन कृत, बलात्कृत, साहसिक (की *f.*), बल in comp.; 'f. consent' बलानुमोदनं. **-Forcibly,** *adv.* (by force) बलेन, बलात्, प्रसभं, प्रसह्य, बलात्कारेण, हठात्. **2** सगौरवं, दृढतया.

**Force-meat,** *s.* मिष्टान्नं, उपस्करः, व्यंजनं.

**Forceps,** *s.* सदंशकं-शिका.

**Ford,** *s.* तीर्थं, तरणस्थानं-स्थलं, घट्टः. **-v. t.** पद्भ्यां तॄ 1 P or पारं गम् 1 P. **-able,** *a.* अल्पजल, सुतर, सुप्रतर; 'the rivers having become f.' सुखोत्तारतामापन्नास्वापगासु (Ka. 326).

**Fore,** *a.* अग्र, पूर्व, अग्रगामिन्; gen. ex. by अग्र, पूर्व in comp.; 'f.-fathers' पूर्वजाः, पितरः, पूर्वे-पूर्वाः, वृद्धाः; 'f.-finger' प्रदेशिनी, तर्जनी; 'f.-foot' अग्रपादः; 'f.-head' ललाटं, भालं, ललाट-भाल-पट्टं, अलि-(ली)कं, गोधिः; 'f.-land' अंतरीपः-पं, उदग्रभूः-भूमिः; 'fore leg' *s.* पूर्व-अग्र-पादः 'f.-lock' ललाटकेशः-रुहः; 'f.-man' अध्यक्षः, अधिष्ठातृ *m.*, अधीशः; 'f.-mentioned-named-said-spoken' प्रागुक्त, पूर्वोक्त, पूर्वकथित; 'f. mast' अग्रकूपकः; f.-most' प्रधान, उत्कृष्ट, परम; 'f.-noon' पूर्वाह्णः,-कालः; 'f.-part' अग्रभागः, पूर्व-आदि-प्रथम-भागः; 'f.-rank' अग्र-प्रधान-पदं; 'f.-tooth' अग्रदंतः, राजदंतः, 'f.-ward' सेनामुखं, रणशिरस् *n.*; 'foreward', *s.* *See* **Preface.**

**Forearm,** *s.* प्रकोष्ठः, अग्रभुजः-हस्तः-बाहुः. **-v. t.** पूर्वं संनह् 4 P or c. or सज्जीकृ 8 U.

**Forebode,** *v. t.* आ-,सूच् 10, प्राक् आ-विद् c., पूर्वं कथ् 10; (अनिष्टं) पूर्वं ज्ञा 9 U or अव-गम् 1 P, अनु-मा 3 A; *See* **Bode;** 'the tawny lightning f. s a hurricane' वाताय कपिला विद्युत् (S. K.). **-er,** *s.* अनिष्टावेदकः, अनिष्टसूचकः. **-ing,** *s.* अनिष्टसूचनं-ज्ञानं-दर्शनं.

**Forecast,** *v. t.* पूर्व-अग्रे चिंत् 10 or निरूप् 10 or निर्दिश् 6 P or अनुसं-धा 3 U. **-s.** पूर्वकल्पना-विवेकः, अग्रनिरूपणं, पूर्वचिंतनं, दीर्घदृष्टि *f.*

**Foreclose,** *v. t.* प्रतिबंध् 9 P, प्रति-नि-षिध् 1 P. **-ure,** *s.* प्रतिबंधः, प्रतिषेधः.

**Fore-determine,** *v. t.* अग्रे-पूर्वं-निर्णी 1 P or निश्चि 5 U.

**Foredoom,** *v. t.* पूर्वं निर्दिश् 6 P or वि-चर् c.

**Fore-fend,** *See* **Forbid.**

**Forego,** *v. t.* त्यज् 1 P, हा 3 P, उत्-वि-सृज् 6 P; 'I shall f. my name' स्वनामत्यागं करोमि (P. 1); 'a foregone conclusion' पूर्वनिर्णीतः-प्रागेवसिद्धः-सिद्धांतः.

**Foreign,** *a.* विदेशीय, वैदेशिक-पारदेशिक (की *f.*), विदेशज, विदेशिन्, अन्य-भिन्न-देशज-देशीय-देशोद्भव, पारदेश्य, विदेशादागत, बहिर्देशोद्भव; 'a f. country' विदेशः, परदेशः, देशांतरं. 2 बाह्य, बहिर्भव, अप्रस्तुत, अप्रकृत; 'this is f. to our present inquiry' अप्रकृतमेतदस्मिन् विषये. **-er,** *s.* वैदेशिकः, पारदेशिकः, अन्यदेशीयः-देशजः; *See* (*a.*). **-ness,** *s.* बाह्यता, भिन्नता; अप्रकृतता, असंबंधः.

**Fore-imagine,** *v. t.* पूर्वं-अग्रे-चिंत् 10 or मन् 4 A.

**Fore-judge,** *v. t.* पूर्वं अवेक्ष् 1 A, विचर् c. or निर्णी 1 P.

**Fore-know,** *v. t.* पूर्वं ज्ञा 9 U or बुध् 1 P, or विद् 2 P; **Know,** q. v.; प्रदृश् 1 P, अग्रे निरूप् 10. **-ledge,** *s.* अग्र-पूर्व-ज्ञानं, भविष्यज्ज्ञानं, अग्रनिरूपणं, अग्र-पूर्व-दृष्टि *f.*

**Forensic,** *a.* व्यावहारिक (की *f.*), व्यवहारानुबद्ध.

**Fore ordain,** *v. t.* अग्रे-पूर्वं-निर्दिश् 6 P or नियुज् 7 A, 10 or वि-धा 3 U.

**Forerun,** *v. i.* पूर्वं-पुरः-अग्रे-सृ or धाव् or गम् 1 P or वृत् 1 A or या-इ 2 P. **-ner,** *s.* अग्रेसरः, पुरो-गः-गामिन् *m*, अग्र-गः-गामिन् *m.*, अग्रवर्तिन् *m.*, अग्रगतः, पूर्वपुरुषः.

**Fore-say,-speak,** प्राक्-पूर्वं-वद् 1 P, or कथ् 10.

**Foresee,** *v. t.* पूर्वं-दृश् 1 P or ज्ञा 9 U; भावि-अनागतं-दृश् or अवेक्ष् 1 A, अग्रे निरूप् 10; gen. ex. by भाविन्; 'I f. my ruin' जानामि भाविनं नाशं. **-Foresight,** *s.* दूरदर्शित्वं-ता, दूर-दीर्घ-दृष्टि *f.*, अग्रनिरूपणं, दूरदर्शनं.